# सम्बन्धमाभाषणपूर्वम्।

---

**Que.1. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**केरलराज्यस्य प्रथमः विद्याभ्यासमन्त्री आसीत् जोसफ् मुण्डश्शेरी । सः1903 जूलै मासस्य१७तमे दिनाङ्के तृश्शूर् जिल्लायां कण्टशांकटव् ग्रामे जाता। सः राष्ट्रीय, साहित्यपत्रिका प्रवर्तन मण्डलेषु व्यापृतः आसीत्।कोच्ची शास्त्र साङ्केतिक सर्वकलाशालायाः प्रथमः उपकुलपतिः आसीत् । 1977 ओक्टोबर् मासे सः अस्मात् लोकात् निरगात्।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.2. प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।** **[Marks :(4)]**

**डा. के एन् एषुत्तच्चन् महाशयेन विरचितं महाकाव्यं भवति केरलोदयम्। काव्येऽस्मिन् एकविंशति सर्गाः सन्तिः ते सर्गाः पञ्च मञ्जरीत्वेन विभक्ताः।केरलोत्पत्तेरनन्तरं आधुनिककेरलराज्य रूपीकरणपर्यन्तं विद्यमानाः घटना एव अस्य काव्यस्य प्रतिपाद्यविषयः। काव्येऽस्मिन् कविः केरलराज्यमधिकृत्य तथा केरलस्य प्रकृतिसौन्दर्यञ्च वर्णयति। केन्द्रसाहित्यअक्कादमी पुरस्कारेण आदृता इयं कृतिः।**

**क. केरलोदयं महाकाव्यस्य कर्ता कः ?**

**ख. केरलोदये कति सर्गाः सन्ति ?**

**ग. केरलोदयस्य प्रतिपाद्यविषयः कः ?**

**घ. काव्येऽस्मिन् कविः किं वर्णयति ?**

**ङ. 'काव्येऽस्मिन्' इत्यस्य पददच्छेदः कः ?**

**Ans.** प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।

क. डा.के.एन्. एषुत्तच्चन्।

ख. एकविंशति सर्गाः।

ग. केरलोत्पत्तेरनन्तरम् आधुनिककेरलराज्यरूपीकरणपर्यन्तं घटना।

घ. काव्ये +अस्मिन्।

**Que.3. गद्यक्रमं लिखत।** **[Marks :(2)]**

**1. सम्बन्धमाभाषाणपूर्वमाहु-**

**वृत्तः स नौ सङ्गतयोर्वनान्ते।**

**तद्भूतनाथानुग! नार्हसि त्वं**

**सम्बन्धिनो मे प्रणयं विहन्तुम्।।**

**सम्बन्धम् ---- आहुः सः वनान्ते ---- नौ वृत्तः तत् भूतनाथानुग---- त्वम् ---- मे प्रणयम् ---- न अर्हसि।**

**2. अथान्धकारं गिरिगह्वराणां**

**दंष्ट्रामयूखैः शकलानि कुर्वन्।**

**भूयः स भूतेश्वरपार्श्ववर्ती**

**किञ्चिद्विहस्यार्थपतिं बभाषे।।**

**अथ ---- सः गिरिगह्वराणाम् ---- दंष्ट्रामयूखैः----कुर्वन् ----विहस्य अर्थपतिम् ---- बभाषे।**

**3. निशम्य देवानुचरस्य वाचं**

**मनुष्यदेवः पुनरप्युवाच।**

**धेन्वा तदध्यासितकातराक्ष्या**

**निरीक्ष्यमाणः सुतरां दयालुः।।**

**देवानुचरस्य ---- निशम्य ---- धेन्वा निरीक्ष्यमाणः ---- दयालुः (सन्) ---- पुनरपि उवाच।**

**4 एकातपत्रं जगतः प्रभुत्वं**

**नवं वयः कान्तमिदं वपुश्च।**

**अल्पस्य हेतोर्बहुहातुमिच्छन्**

**विचारमूढः प्रतिभासि मे त्वम्।।**

**एकातपत्रं जगतः ---- नवं वयः इदं कान्तं ---- अल्पस्य हेतोः बहु हातुम् ----त्वम् ---- प्रतिभासि।**

**5 भवानपीदं परवानवैति**

**महान् हि यत्नस्तव देवदारौ।**

**स्थातुं नियोक्तुर्नहि शक्यमग्रे**

**विनाश्य रक्ष्यं स्वयमक्षतेन।।**

**परवान् भवानपि ---- अवैति हि ---- देवदारै महान् यत्नः ---- विनाश्य स्वयम्---- नियोक्तुः ... स्थातुं न शक्यम् हि ---- अक्षतेन।**

**Ans.** गद्यक्रमं लिखत।

आशयव्यक्तता ।

सूचनानां पूर्णता।

भाषाशौलीम्।

**Que.4. गद्यांशं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत। [Marks :(4)]**

**पञ्चमहाकाव्येषु अन्यतमं भवति रघुवंशम्। अस्य रचयिता भवति महाकविः कालिदासः।तस्य द्वितीयसर्गे अन्तर्भवति सिंहदिलीपयोः संवादः। रघुवंशराजा दिलीपः पत्न्या सुदक्षिणया सह नन्दिनीपरिचरणं करोति। अनपत्यतायाः दुःखनिवारणाय कुलगुरुणा वसिष्ठेन नन्दिनीपरिचरणं निर्दिष्टमासीत्। एतद्विषयकं वर्णनं रचनाचातुर्या सहृदयाह्लादकरं विद्यते।**

**1. रघुवंशमहाकाव्यस्य कर्ता कः ?**

**2. सिंहदिलीपसंवादः रघुवंशस्य कस्मिन् सर्गे भवति ?**

**3. दिलीपस्य पत्नी का?**

**4. कुलगुरुणा कस्याः परिचरणं निर्दिष्टमासीत्?**

**Ans.** गद्यांशं पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखत।

1. रघुवंशमहाकाव्यस्य कर्ता कालिदासः भवति।

2. सिंहदिलीपसंवादः रघुवंशस्य द्वितीय सर्गे भवति।

3. दिलीपस्य पत्नी सुदक्षिणा।

4. कुलगुरुणा नन्दिनीपरिचरणं निर्दिष्टम्।

**Que.5. उदाहरणानुसारं विग्रहवाक्यं लिखत। [Marks :(1)]**

**क) उदा : प्रजानाथः - प्रजानां नाथः।**

**भूतनाथः - ------------।**

**गणनाथः - ------------।**

**नागराजः - ------------।**

**ख) उदा : एकातपत्रम् - एकं च तत् आतपत्रं च।**

**शीतोष्णम् - ------------।**

**Ans.** उदाहरणानुसारं विग्रहवाक्यं लिखत।

क) भूतानां नाथः।

गणानां नाथः।

नागानां राजः।

ख) शीतं च तत् उष्णं च।

**Que.6. उदाहरणानुसारं एकंपदं लिखत। [Marks :(1)]**

**क) उदा - चेराणां राजा - चेरराजः।**

**नृपाणां राजा - ------------।**

**मृगाणां राजा - ------------।**

**गिरीणां राजा - ------------।**

**कवीनां राजा - ------------।**

**कपीनां राजा - ------------।**

**ख) उदा : भूतानाम् ईश्वरः - भूतेश्वरः।**

**गणानाम् ईश्वरः - ------------।**

**विघ्नानाम् ईश्वरः - ------------।**

**ग) उदा : प्रभोः भावः - प्रभुत्वम्।**

**विभोः भावः - ------------।**

**गुरोः भावः - ------------।**

**लघोः भावः - ------------।**

**घ) उदा : विचारे मूढः - विचारमूढः।**

**विनिमये मूढः - ------------।**

**सदाचारे मूढः - ------------।**

**Ans.** उदाहरणानुसारं एकंपदं लिखत।

क) नृपराज:।

मृगराजः

गिरिराजः

कविराजः

कपिराजः

ख) गणेशवरः

विघ्नेश्वरः

ग) विभुत्वम्

गुरुत्वम्

लघुत्वम्

घ) विनिमयमूढः।

सदाचारमूढः।

**Que.7. उदाहरणानुसारं पदच्छेदं लिखत।** **[Marks :(3)]**

**क) उदा :- यत्रस्तव - यत्र + तव।**

**पुत्रस्तव - --------- + ------------।**

**देवास्तव - --------- + ------------।**

**देहस्तव - --------- + ------------।**

**ख) उदा : नियोक्तुर्न - नियोक्तुः+ न।**

**भोक्तुर्न - --------- + ------------।**

**कर्तुर्न - --------- + ------------।**

**भर्तुर्न - --------- + ------------।**

**ग) उदा : स्वयम् + अक्षतेन - स्वयमक्षतेन।**

**---- + ---- - अयमन्यः।**

**---- + ---- - इयमन्या।**

**---- + ---- - वयमद्य।**

**Ans.** उदाहरणानुसारं पदच्छेदं लिखत।

क) पुत्रः+ तव ।

देवाः + तव ।

देहः+ तव ।

ख) भोक्तुः + न ।

कर्तुः + न ।

भर्तुः + न ।

ग) अयम् + अन्यः।

इयम् + अन्या।

वयम् + अद्य।

**Que.8. सिंहदिलीपयोः सम्भषणं पूरयत।** **[Marks :(3)]**

**(दिलीपं परीक्षितुं नन्दिनी हिमालयप्रान्तं प्राविशत्। तदा केनचित्सिंहेन सा आक्रान्ता। दिलीपस्तु तां रक्षितुम् उद्‌युक्तः । तयोः सम्भाषणं लिखत।)**

**सिंहः - भोः ममाधीनं प्रदेशमागत्य --------- मामक्रमितुं प्रयतते?**

**राजा - मम धेनोः रक्षणार्थं त्वामाक्रमितुं प्रयते।**

**सिंहः - अत्रागता धेनुरियं मम भक्षणमेव।**

**राजा - -------- मया रक्षणीया, अतः भवते आहाराय न ददामि।**

**सिंहः - अहं ममाहारं त्यक्तुं न सन्नद्धः।**

**राजा - भवान् माम् आहारत्वेन स्वीकरोतु। धेनुं त्यजतु।**

**सिंहः - मां ------- स्वीकरोतु इति वचनेन त्वं विचारमूढ इति चिन्तयामि।**

**राजा - ---------------------------------।**

**IX  मध्येमार्गं मिलितयोः मित्रयोः संभाषणं यथोचितं पूरयत।**

**राजीवः - नमस्ते सुरेश! कुत्र गच्छति?**

**सुरेशः - नमस्ते राजीव! अहं -------- गच्छामि।**

**राजीवः - ग्रन्थालयः कुत्र वर्तते?**

**सुरेशः - ग्रन्थालयः -------- वर्तते।**

**राजीवः - नगरपार्श्वे वा? अहमपि आगच्छामि।ममापि आवश्यकम्।**

**सुरेशः - किं पुस्तकम् आवश्यकम्?**

**जीवः - ----------------------।**

**राजीवः - तत्तु कालिदासेन विरचितं खलु।**

**सुरेशः - आम्। अस्माकं पाठभागे कथा वर्तते।**

**राजीवः - दिलीपराजस्य सा कथा अतिहृद्या एव।**

**सुरेशः - -------------------।**

**Ans.** सिंहदिलीपयोः सम्भषणं पूरयत।

आशयव्यक्तता ।

क्रमशः लेखनम्।

भाषाशौलीम् ।

IX. मध्येमार्गं मिलितयोः मित्रयोः सम्भाषणं यथोचितं पूरयत।

आशयव्यक्तता ।

क्रमशः लेखनम् ।

भाषाशौलीम् ।

**Que.9. सूचनाः पठित्वा कथां विपुलीकुरुत।** **[Marks :(4)]**

**कालिदासः ---- रघुवंशः ----दिलीपः सुदक्षिणा च ---- सन्तानराहित्यम् ----- नन्दिनीसेवा ----- हिमालयगुहा ----सिंहस्य आक्रमणं ---- धेनुरक्षायै स्वदेहार्पणं---- सिंहस्य प्रतिवचनम् ----– सम्भाषणेन सौहृदम्।**

**Ans.** सूचनाः पठित्वा कथां विपुलीकुरुत।

आशयव्यक्तता ।

सूचनानां पूर्णता ।

भाषाशौलीम् ।

**Que.10. सूचनाः पठित्वा लघुटिप्पणीं लिखत।** **[Marks :(4)]**

**काव्यम् ---- पञ्चमहाकाव्यानि ----– कालिदासः ---- रघुवंशराजानां कथा–---- दिलीपः सुदक्षिणा च---- अनपत्यतादुःखं ---- वसिष्ठादेशः ---- नन्दिनीपरिचरणं ------ रचनाचातुरी ------ सहृदयाह्लादः।**

**Ans.** सूचनाः पठित्वा लघुटिप्पणीं लिखत।

उपन्यास घटना।

आशयव्यक्तता ।

भाषाशौलीं ।

**Que.11. क्त्वान्त-ल्यबन्त- तुमुन्नन्तानि अव्ययानि चित्वा लिखत।** **[Marks :(3)]**

**1. प्रलयकाले धीवराः स्वप्राणभयं त्यक्त्वा नौकाः उपयुज्य पीडितान् रक्षितुं प्रायतन्त।**

**2. सिंहस्य आक्रमणेन धेनोः जीवापायं मत्वा दिलीपः स्वतूणीरात् शरं स्वीकृत्य सिंहं प्रहर्तुम् उद्‌युक्तः अभवत्।**

**3. स्वप्राणान् संरक्ष्य तथा धेनुं त्यक्त्वा च प्रजापालनाय प्रतिगन्तुं सिंहः राजानम् उपदिष्टवान्।**

**4. छात्राः संशयान् दूरीकृत्य पाठं सम्यक् पठित्वा परीक्षां लेखितुं सज्जाः अभवन्।**

**Ans.** क्त्वान्त-ल्यबन्त- तुमुन्नन्तानि अव्ययानि चित्वा लिखत।

1. त्यक्त्वा उपयुज्य रक्षितुम् ।

2. मत्वा स्वीकृत्य प्रहर्तुम् ।

3. त्यक्त्वा संरक्ष्य प्रतिगन्तुम्।

4. दूरीकृत्य पठित्वा लेखितुम्।

**Que.12. कोष्ठकात् उचितमुत्तरं चित्वा लिखत।** **[Marks :(1)]**

**1. दिलीपस्य वंशः कः?**

**(मूषिकवंशः, सूर्यवंशः, चन्द्रवंशः)**

**2. दिलीपः केन कारणेन विषण्णः?**

**(अनपत्यतादुःखेन, दारिद्रेण, आक्रमणेन)**

**3. दिलीपस्य पत्नी का?**

**(सुदक्षिणा, दमयन्ती, शकुन्तला)**

**4. सूर्यवंशस्य कुलगुरुः कः?**

**(वसिष्ठः, अगस्त्यः, विश्वामित्रः)**

**5. पुत्रलाभार्थं दिलीपः काम् असेवत?**

**(कामधेनुं , सिंहीं, नन्दिनीं)**

**6. कामधेनुसुता का?**

**(नन्दिनी, सुरभिः, देवधेनुः)**

**7. दिलीपस्य भक्तिं परीक्षितुं नन्दिनी कुत्र प्राविशत्?**

**(तटं, गह्वरं, समुद्रम्)**

**8. दिलीपं परीक्षितुं नन्दिनी कस्य पर्वतस्य गह्वरं प्राविशत्?**

**(हिमालयस्य, सुमेरोः, मैनाकस्य)**

**9. नन्दिनी का आसीत्?**

**(सिंही, राजपत्नी, गौः)**

**10. नन्दिनी केन आक्रान्ता?**

**(व्याघ्रेण, सिंहेन, नृपेण)**

**Ans.** कोष्ठकात् उचितमुत्तरं चित्वा लिखत।

1. सूर्यवंशः

2. अनपत्यतादुःखेन

3. सुदक्षिणा

4. वसिष्ठः

5. नन्दिनीम्

6. नन्दिनी

7. गह्वरम्

8. हिमालयस्य

9. गौः

10. सिंहेन

**Que.13. यथोचितं योजयत।** **[Marks :(4)]**

**क) नवम् - तुमुन्नन्तम्**

**कान्तम् - आतपत्रम्।**

**एकम् - वयः**

**हातुम् - मनोहरम्**

**ख) अन्धकारः - किरणः**

**मयूखः - शरीरम्**

**अर्थपतिः - गुहा**

**गह्वरः - तमः**

**वपुः - राजा।**

**ग) कान्तम् - समृद्धम्**

**उपप्लवः - ल्यबन्तमव्ययम्**

**ऋद्धम् - प्रसिद्धः**

**निशम्य - उपद्रवः**

**रूढः - मनोहरम्।**

**घ) कामधेनुसुता - बाणः**

**रघुवंशम् - दुःखितः**

**सूर्यवंशकुलगुरुः - नन्दिनी**

**शरः - कालिदासः**

**विषण्णः - वसिष्ठः।**

**Ans.** यथोचितं योजयत।

क) नवम् - वयः

कान्तम् - मनोहरम्

एकम् - आतपत्रम्

हातुम् - तुमुन्नन्तम्

ख) अन्धकारः - तमः

मयूखः - किरणः

अर्थपतिः - राजा

गह्वरः - गुहा

वपुः - शरीरम्

ग) कान्तम् - मनोहरम्

उपप्लवः - उपद्रवः

ऋद्धम् - समृद्धम्

निशम्य - ल्यबन्तमव्ययम्

रूढः - प्रसिद्धः

घ) कामधेनुसुता - नन्दिनी

रघुवंशम् - कालिदासः

सूर्यवंशकुलगुरुः - वसिष्ठः

शरः - बाणः

विषण्णः - दुःखितः

**Que.14. उदाहरणानुसारं सन्धत्त।** **[Marks :(3)]**

**क) उदा- तत्+ रक्ष -तद्रक्ष**

**मत् + रक्ष --------- + ------------ ।**

**तस्मात् + रक्ष --------- + ------------ ।**

**तैलात् + रक्ष --------- + ------------ ।**

**ख) उदा- पदम्+ ऐन्द्रम् - पदमैन्द्रम्।**

**धनम्+ ऐश्वर्यम् --------- + ------------ ।**

**पुत्रम्+ ऐक्षत --------- + ------------ ।**

**माम्+ ऐच्छत् --------- + ------------ ।**

**ग) उदा- पुनः+ अपि- पुनरपि।**

**गुरुः+ अपि --------- + ------------ ।**

**धेनुः+ अपि --------- + ------------ ।**

**घ) उदा- शश्वत् + उपप्लवेभ्यः - शश्वदुपप्लवेभ्यः।**

**पश्चात् + उपागतः --------- + ------------ ।**

**ग्रामात् + आगतः --------- + ------------ ।**

**तस्मात् + उद्धृत्य। --------- + ------------ ।**

**कस्मात् + उदाहृतम्। --------- + ------------ ।**

**तस्मात् + उद्यानम्। --------- + ------------ ।**

**ङ) उदा- वपुश्च- वपुः + च।**

**गुरुश्च - --------- + ------------ ।**

**धेनुश्च - --------- + ------------ ।**

**अलाबुश्च - --------- + ------------ ।**

**च) उदा- गौरेका - गौः+ एका।**

**नौरेका - --------- + ------------ ।**

**कवेरेव - --------- + ------------ ।**

**मुनेरेव - --------- + ------------ ।**

**छ) उदा- हेतोर्बहुहातुमिच्छन् - हेतोः+ बहुहातुमिच्छन्।**

**उभयोर्बलयोः - --------- + ------------ ।**

**तयोर्बुद्धिशक्तिः- --------- + ------------ ।**

**तयोर्बालयोः - --------- + ------------ ।**

**ज) उदा- पितेव- पिता + इव।**

**मातेव - --------- + ------------ ।**

**लतेव - --------- + ------------ ।**

**सीतेव - --------- + ------------ ।**

**Ans.** उदाहरणानुसारं सन्धत्त।

क) मद्रक्ष ।

तस्माद्रक्ष ।

तैलाद्रक्ष ।

ख) धनमैश्वर्यम्।

पुत्रमैक्षत।

मामैच्छत्

ग) गुरुरपि।

धेनुरपि ।

घ) पश्चादुपागतः।

ग्रामादागतः।

तस्मादुद्धृत्य।

कस्मादुदाहृतम्।

तस्मादुद्यानम्।

ङ) गुरुः+ च ।

धेनुः + च ।

अलाबुः+ च ।

च) नौः+ एका ।

कवेः + एव ।

मुनेः+ एव ।

छ) उभयोः + बलयोः ।

तयोः + बुद्धिशक्तिः ।

तयोः+बालयोः ।

ज) माता + इव।

लता + इव।

सीता + इव।